देवभूमि-सौरभम्
Devabhūmisaurabham
Vol 2 Issue 1 July-Dec 2024 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# काव्यशास्त्रे शोधस्यावसराः

**डा.अनिलकुमारः**
**सहायकाचार्यः( साहित्यविभागः)**
**के.सं.वि.श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः**
**मो.9968115307**

**शोधपत्रसारः, उद्देश्यञ्च**

अनुसन्धानस्य विषयाः सर्वत्र नैव भवन्ति यत्र कापि समस्या, अथवा किमपि नूतनं तथ्यं प्रकाशनीयं भवति तत्रैव शोधस्यावश्यकता। काव्यशास्त्रं काव्यस्यैवांगभूतं तस्मात् काव्ये काव्यशास्त्रे च परस्परं सम्बन्धो लक्ष्यलक्षणभावत्वेन विद्यते। काव्यस्य बहूनि तत्वानि सन्त्येतादृशानि येषां विषये शोधस्यावश्याकतानुभूयते। रसस्य संख्या, ध्वनिसिद्धान्तस्य विरोधिनां मतानि, चमत्कारसिद्धान्तस्यावधारणा, रीतेर्भेदाः, शान्तरसस्य स्थितिः, काव्यस्य कारणम्, रमणीयतायाः लक्षणम् इत्यादीनि सन्ति शोधस्य विषयाः। एकस्मिन् विषये एकमता नैव दृश्यन्ते काव्यविदः किमर्थम्? यदि शब्दार्थौ काव्यमिति काव्यस्य लक्षणं तदा शब्दः काव्यमिति किमर्थम्, एवमेव नव रसा यदि भरतेनोक्ताः तदा एको रसः करुण एव निमित्तभेदात्, तस्माददद्भुतमेवाह कृती नारायणो रसम्, एवमेव रीतीनां विषये सा चतुर्विधा, रीतयस्तिस्रः एवम्भूताः प्रश्नाः पुनः पुनः चिन्तनाय चित्तं प्रेरयन्ति। अतः तमेव विषयमादाय काव्यशास्त्रे शोधस्यावसराः इति शीर्षकान्विते शोधपत्रे किञ्चिदत्र विचारः कृतः। कुत्र कुत्र अस्माभिः शोधकार्यं कर्तुं शक्यते अनेन काचित् दृष्टिरागमिष्यति चेत्सफलो मे प्रयासः।

**शोधपत्रम्-**

कवेः कर्म काव्यमिति व्युत्पत्तिनिमितिम्, तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि[1] इति मम्मटप्रोक्तं काव्यलक्षणं प्रवृत्तिनिमितम्। तच्छास्त्रं काव्यशास्त्रम्, यस्यापरन्नाम अलङ्कारशास्त्रं सौन्दर्यशास्त्रं वा। अर्थात् काव्यशास्त्रमिति कथनेन अत्र उभयोर्ग्रहणं मया विहितम्, यतोहि काव्यं लक्ष्यरूपं शास्त्रञ्च लक्षणरूपम्। उभयोः सापेक्षत्वं विद्यते। किमर्थमिति चेत्काव्यस्य सर्वेषां सौन्दर्यधायकतत्त्वानां लक्षणाण्यत्र विद्यन्ते अतः काव्यशास्त्रमिति निश्चितम्। शोधस्याभिप्रायो भवति अनुसन्धानं समस्यासमाधानम् अनुचिन्तनं वा। अतः काव्ये काव्यशास्त्रे च यत्स्थलं विचारणीयं वर्तते तदुपरि चर्चात्र कर्त्तव्येति शीर्षकस्यार्थः। येन किमपि नूतनं तत्त्वं चिन्तनं वा समुत्पद्येत। यद्यपि अधुनापर्यन्तमपि वस्तुतो नैव केनापि वक्तुं शक्यते कानि कानि तानि तत्त्वानि सन्ति, यैः काव्यस्य सौन्दर्यं वर्धेत, तथापि बाहुल्येन व्यपदेशा भवन्ति, तस्मात् षट्सिद्धान्तेषु तान्यन्तर्भावयन्त्याचार्याः। ते च सिद्धान्ता रसालङ्काररीतिध्वनिवक्रोक्त्यौचित्याः।

---

[1] का.प्र.1.3

अत्रादौ रसस्य विषये चिन्तयामः। यस्मिन् विषये साहित्यदर्पणकारो निर्दिशति- "रसे सारश्चमत्कारः"[2] इति काव्यप्रकाशकारश्च "अलौकिकचमत्कारकारी श्रृगांरादिको रसः"[3] अत्र चमत्कार एव मूलतत्त्वं विभाति। रसगङ्गाधरेऽपि- काव्यजीवितं चमत्कारित्वं चाविशिष्टम्,[4] किं नाम चमत्कार इति जिज्ञासायां वदति प.जगन्नाथः" लोकोत्तरत्वं चाह्लादगतश्चमत्कारत्वापरपर्यायोऽनुभवसाक्षिको जातिविशेषः।"[5] अर्थात् लोकोत्तरत्वमिति चमत्कारत्वम्। एवं कथनेन काव्ये चमत्कारस्य प्राधान्यं स्वीकर्तव्यं न वेति चिन्तनस्य विषयः। स्वीक्रियते चेत्तदा चमत्कार एवात्मा तस्य प्रधानत्वात्। चमत्कारविषये चमत्कारविचारचर्चेति ग्रन्थो जम्मूविश्वविद्यालये संस्कृतविभागस्य आचार्येण प्रो. रामप्रतापवेदालङ्कारेण रचितः। तत्र कथं चमत्कार एव काव्यस्य मूलतत्त्वं विद्यते तत्प्रतिपादितमस्ति। अतोऽत्रास्माभिश्चिन्तनमस्मिन् विषये विधेयम्। काव्यशास्त्रे शब्दशक्तीनां विषये विस्तरेण चर्चा लभ्यते। तत्र विश्वनाथमते लक्षणाया लक्षणं नोचितं किमर्थमिति चेत् ययान्योऽर्थः प्रतीयते इत्यत्र प्रतीयते इत्यस्य शब्दस्यार्थः लक्ष्यते नास्तीति साहित्यबिन्दुकारेणापि प्रतिपादितम्।

ध्वन्यालोके अभाववादस्य प्रथमो विकल्प एव अभावं सूचयति न त्वन्यौ द्वौ अन्तर्भावत्वादस्वीकरणाच्च। यतोहि अभावस्तु तस्यैव सिद्धयति यस्य भावो नास्ति। प्रथमे मते यथोक्तं तदेवम्- "तत्र केचिदाचक्षीरन् शब्दार्थशरीरं तावत्काव्यम्। तस्य शब्दगताश्चारुत्वहेतवोऽनुप्रासोपमादयः प्रसिद्धा एव। अर्थगताश्चोपमादयः। वर्णसङ्घटनाधर्माश्च ये माधुर्यादयस्तेऽपि प्रतीयन्ते। तदनतिरिक्तवृत्तयोऽपि या कैश्चिदुपनागरिकाद्याः प्रकाशिताः, ता अपि गताः श्रवणगोचरम्। रीतयश्च वैदर्भीप्रभृतयः। तद्व्यतिरिक्तः कोऽयं ध्वनिर्नामेति।"[6] अत्रैव वस्तुतः एतेषु तत्त्वेषु ध्वनिशब्दस्य नैव ग्रहणमतोऽत्र अभाववादस्य स्वरूपं वक्तुं शक्यते। परं च द्वितीये "प्रसिद्धप्रस्थानव्यतिरेकिणः काव्यप्रकारस्य काव्यत्वहानेः।"[7] इत्यनेनैव ज्ञायते यद् ध्वनिरस्ति परं चैतैर्न स्वीक्रियते। एवमत्राभाववादस्य पूर्णस्वरूपं नास्तीति मे मतिः। तृतीये च "कामनीयकमनतिवर्तमानस्य तस्योक्तेष्वेव चारुत्वहेतुष्वन्तर्भावात्।"[8] अत्र यदि ते अन्तर्भावयन्ति तदा एवं वक्तुं शक्यते यत्ते अभाववादिनः ध्वनेर्भावं स्वीकुर्वन्ति परञ्चान्येषु तत्त्वेषु अर्न्तभावं कृत्वा। अर्थात् अन्तर्भावो विद्यते न त्वभावः। यद्यपि अभाववादस्य खण्डनं ध्वन्यालोके कृतमस्ति। एवंभूतेषु स्थलेष्वस्माभिश्चिन्तनं विधेयम्।

रसस्य भेदानां विषयेऽपि जिज्ञासा समुत्पद्यते। नाट्यशास्त्रे चत्वारो मुख्या रसास्तेभ्योऽन्येषामुत्पत्तिः। अष्टौ नाट्ये रसाः स्मृताः। शान्तोऽपि नवमो रसः। अत्र अपिशब्देन नाट्ये आधुनिकानां सम्मतिरिति टीकाकारा वदन्ति। आनन्दवर्धनेनाभिनवगुप्तेन च शान्तरसस्य विषये बहुचर्चितम्। अभिनवगुप्तानुसारम् - "शृंगार-----बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः" इत्यस्य स्थाने "शृङ्गार-----बीभत्साद्भुतशान्ताश्च नव नाट्ये रसाः स्मृताः" अपि च "जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः" इत्यस्य स्थाने "जुगुप्सा विस्मयशमाः स्थायिभावाः प्रकीर्तिताः चेत्यष्टौ नाट्ये रसाः स्मृताः" एवं पाठ आसीत्, परं च शान्तापलापिनस्तथा नैव स्वीकृतवन्तः। अस्य कथनस्य प्रमाणम् अभिनवभारत्यामेवं विद्यते- "रसाः। ते च नव। शान्तापलापिनस्त्वष्टाविति

---

[2] सा.द.3.3वृत्तौ

[3] का.प्र.4

[4] रस.ग.प्र.आ.पृ.24

[5] रस.ग.प्र.आ.पृ.11

[6] ध्व.1.1वृत्तौ

[7] ध्व.1.1वृत्तौ

[8] ध्व.1.1वृत्तौ

तत्र पठन्ति" तस्मादस्ति शान्तो रसः। इतिहासपुराणाभिधानकोशादौ च नव रसा श्रूयन्ते।" एवं नाट्येऽपि शान्तरसो भवतीति विचारणीयो विषयः। अपि च- "तत्र सर्वरसानां शान्तप्राय एवास्वादः विषयेभ्यो विपरिवृत्त्या।" अनेन कथनेन सर्वेषु रसेषु शान्तरसस्यैव प्राधान्यम् अभिनवगुप्तेन सूचितम्।

संस्कृतनाटककारेषु भवभूतेः स्थानं महत्त्वपूर्णमस्ति। उत्तररामचरितस्येदं पद्यं तस्य स्मरणीयं भवति-

"एको रसः करुण एव निमित्तभेदाद्

भिन्नः पृथक् पृथगिवाश्रयते विवर्तान्।

आर्वतबुद्बुदतरंगमयान् विकारान-

म्भो यथा सलिलमेव हि तत्समग्रम्।।"[9]

एवमेकस्य रसस्यैव अङ्गानि भवन्त्यन्ये रसाः, एवं मतं भात्यत्र भवभूतेः। साहित्यदर्पणकारेण धर्मदत्तस्य विषये तृतीये परिच्छेदे चर्चा कृतास्ति तेन "सर्वत्राप्यद्भुतो रसः"[10] इति यदुक्तं तस्माद् अद्भुतरसस्यैव प्राधान्यं ज्ञायते। रसतरङ्गिणीकारोऽपि विषयेऽस्मिन् वदति- "शृङ्गारादौ चमत्कारदर्शनाद् यत्र मनोविकृतिः अङ्गतया भासते तत्र शृङ्गारादय एव रसाः। प्राधान्येन यत्र भासते तत्र अद्भुत एव रसः।"[11] अद्भुतरसमेव प्राधान्येन केचिदङ्गीकुर्वन्ति। भोजराजस्य मते शृङ्गार एव रसः। अतस्तेनोक्तम्-

रसोऽभिमानोऽहङ्कारः शृङ्गार इति गीयते।

योऽर्थस्तस्यान्वयात् काव्यं कमनीयत्वमश्नुते।।[12]

एवमेव शृङ्गारप्रकाशेऽपि- "तच्च आत्मनोऽहङ्कारगुणविशेषं ब्रूमः। स शृङ्गारः सोऽभिमानः स रसः। तत एव रत्यादयो जायन्ते। तैश्चायं प्रकर्षप्राप्तैः सप्तार्चिरर्चिश्चयैरिव प्रकाशमानः शृङ्गारिणामेव स्वदते इति।"[13] एवमत्र शृङ्गारो रसः सर्वत्र स्वीकृतः। रूपगोस्वामिना पञ्चधा रसः स्वीकृतस्तत्र ये हास्यादया रसा भवन्ति तेषामन्तर्भावर्भक्तिरसे कृतः। यथोक्तम्-

मुख्यस्तु पञ्चधा शान्तः प्रीतिः प्रेयांश्च वत्सलः।

मधुरश्चेत्यमी ज्ञेया यथापूर्वमनुत्तमाः।

हास्याद्भुतस्तथा वीरः करुणो रौद्र इत्यपि।

भयानकः स बीभत्सः इति गौणश्च सप्तधा।

---

[9] उ.रा.3.47

[10] सा.द.3.3वृ.

[11] रस.त.पृ.28

[12] सर.क.501

[13] शृ.प्र.11

एवं भक्तिरसोभेदात् द्वयोर्द्वादशधोच्यते।।[14]

एते चिन्तनीया विषयाः। अत्र भक्तिरसः कथम्, यतोहि देवादिविषया रतिर्भावध्वनिरित्युच्यते। साहित्यदर्पणकारो विश्वनाथोऽपि यं वात्सल्यरसं स्वीकरोति तत्रपि भावध्वनिरेव न तु रसः। मम्मटेनोक्तमपि आदिपदात् गुरुमुनिनृपपुत्रादिविषयेति। अतो विषयेऽस्मिन् विचारणीयं भवति।

रीतेर्भेदानां विषये विमतमपि विचारणीयं वामनमतविरुद्धत्वात्। आचार्यमम्मटेन काव्यप्रकाशे अनुप्रासालङ्कारप्रसङ्गे उपनागरिकापरुषाकोमलावृत्तयः प्रतिपादिताः, तत्रैव चोक्तम्- "केषाञ्चिदेता वैदर्भीप्रमुखा रीतयो मताः"[15] अर्थात् रीतयस्तिस्रः। परञ्च केचिद् आचार्या भिन्नरूपेणैतासां स्वरूपं भेदान् च स्वीकुर्वन्ति यथा बाणभट्टः। हर्षचरिते स प्रतिपादयति-

श्लेषप्रायमुदीच्येषु प्रतीच्येष्वर्थगौरवम्।

उत्प्रेक्षा दाक्षिणात्येषु गौडेष्वक्षरडम्बरः।।[16]

साहित्यदर्पणे "सा चतुर्धा वैदर्भी चाथ गौडी च लाटी पाञ्चालिका तथा"[17] एवमुक्तमस्ति। शारदातनयेन सौराष्ट्री द्राविडी चेति रीतिद्वयमुदाहृतम् अपि चानेन सङ्केतितं यत् तासां तु पञ्चोत्तरशतं भेदाः सन्ति विस्तरभयात् नोक्तम्-

तासु पञ्चोत्तरशतं विधाः प्रोक्ता मनीषिभिः।

ग्रन्थविस्तरभीतेन मया ताभ्यो विरम्यते।।[18] इति

शिङ्गभूपालेन कोमलकठिनमिश्रेभ्यः भिन्ना अपि रीतयो नाम्नोलिखिताः। तद्यथा-

आन्ध्री लाटी च सौराष्ट्रीत्यादयो मिश्ररीतयः।

सन्ति तत्तद्देशविद्वत्प्रियमिश्रणभेदतः।।

तासां ग्रन्थगडुत्वेन लक्षणं नोच्यते मया।

भोजादिग्रन्थकारैस्तु तदाकाङ्क्षिभिरीक्ष्यताम्।।[19]

---

[14] भक्तिरसा.ल.5,9-6-8

[15] का.प्र.9.81

[16] हर्षच.8

[17] सा.द.9.1

[18] भा.प्र.पृ.11

[19] रसा.सु,1.240

एवम्भेदाः किमर्थमित्यस्मिन् विषये चिन्तनस्यावश्यकता विद्यते। सम्प्रति काव्येष्वपि काव्यसौन्दर्यधायकतत्त्वानां लक्षणानि निगदितानि सन्ति काव्येषु तानि लक्षणानि कीदृशानि तदपि ज्ञातव्यमस्माभिः। तस्मादत्रप्यन्वेषणस्यावश्यकता विद्यते। यथोदाहरणम्-

सत्यर्थे सत्सु शब्देषु सति चाक्षरडम्बरे।

शोभते यं विना नोक्तिः स पन्था इति घुष्यते।।[20]

इति नीलकण्ठदीक्षितस्य नलचरिते रीतेर्लक्षणम्। शिशुपालवधमहाकाव्ये महाकविमाघस्य द्वितीये सर्गे पद्यमिदमपि दृष्ट्व्यम्-

म्रदीयसीमपि घनामनल्पगुणकल्पिताम्।

प्रसारयन्ति चतुराश्चित्रं वाचं पटीमिव।।[21]

अनेन कथनेनापि रीतेर्लक्षणं व्यज्यते। भवभूतिना मालतीमाधवे पद्यमिदं यद् दत्तं यथा-

शास्त्रे प्रतिष्ठा सहजश्च बोधः, प्रागल्भ्यमभ्यस्तगुणा च वाणी।

कालानुरोधः प्रतिभानवत्वमेते गुणाः कामदुघाः क्रियासु।[22]

अनेन काव्यस्य कारणविषये सङ्केतः कृतः। आचार्यरहसविहारीद्विवेदोऽपि इदमेव काव्यकारणं साहित्यमींमासायां प्रस्तौति। नाट्यस्य रचनाया विषये मालविकाग्निमित्रे कालिदासस्य पद्यमपि रमणीयं विद्यते। तद्यथा-

देवानामिदमामनन्ति मुनयः शान्तं क्रतुं चाक्षुषं

रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा।

त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते

नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्।।[23]

एवं नाट्यं कीदृशं भवति तदत्र सूचितमस्ति। रसस्य भेदानां विषये रामायणे वाल्मीकिनोक्तम्-

हास्यशृङ्गारकारुण्यरौद्रवीरभयानकैः।

बीभत्साद्भुतसंयुक्तं काव्यमेतद् गायताम्।।[24]

---

[20] न.च.1.10
[21] शिशु.व.2.74
[22] मा.मा.3.11
[23] मा.1.4
[24] रामा.बा.4.9

तथैव मम्मटः काव्यप्रकाशे निगदति नवरसरुचिरेति यथा रामायणे। यथा प.जगन्नाथः काव्यस्य लक्षणप्रसङ्गे रमणीयताया निर्वचनं विदधाति, तथैव माघेन स्ववचनविन्यासैः कृतः। यथा-

दृष्टोऽपि शैलः स मुहुर्मुरारेरपूर्ववद्विस्मयमाततान।

क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः।।[25]

शब्दार्थौ सहितौ काव्यमिति काव्यलक्षणं सुप्रसिद्धमाचार्यभामहस्य तथैव शिशुपालवधेऽपि संकेतितं महाकविना -

नालम्बते दैष्टिकतां न निषीदति पौरुषे।

शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते।।[26]

एवमेव माधुर्यौजःप्रसादाख्याः काव्ये त्रय एव गुणा भवन्ति तत्समर्थयति माघः स्वकाव्ये- "सुकविः स्वीये काव्ये गुणत्रयमेवाश्रयते।" इत्यनेन। दशरूपके अभिनयस्य विषये मधुरोद्धतरूपेण भेदद्वयं यत्प्रतिपादितं तयोरेकं कालिदासो मालविकाग्निमित्रे प्रतिपादयति यथा-

अङ्गैरन्तर्निहितवचनः सूचितः सम्यगर्थः

पादान्यासो लयमनुगतस्तन्मयत्वं रसेषु।

शाखायोनिर्मृदुरभिनयस्यद्विकल्पानुवृत्तौ

भावो भावं नुदति विषयाद्रागबन्धः स एव।।[27]

इति। वैदर्भीरीतेर्विषये बिल्हणो विक्रमाङ्कदेवचरिते वदति-

अनभ्रवृष्टिः श्रवणामृतस्य सरस्वतीविभ्रमजन्मभूमिः।

वैदर्भरीतिः कृतिनामुदेति सौभाग्यलाभप्रतिभूः पदानाम्।।[28]

एवमेव नैषधीचरितेऽपि श्रीहर्षेणोक्तम्-

धन्यासि वैदर्भिगुणैरुदारैर्यया समाकृष्यत नैषधोऽपि।

इतः स्तुतिः का खलु चन्द्रिकाया यदब्धिमप्युत्तरलीकरोति।।[29]

---

[25] शिशु.4.17

[26] शिशु.2.87

[27] मा.2.8

[28] वि.च.1.9

[29] नै.च.3.116

एवं वैदर्भीरीतेर्विषये प्रतिपादितमस्ति। कालिदासो वैदर्भीरीतेर्विषये विशिष्यते इति भाणकं विद्यते। अन्यापि बहूनि तत्वानि सन्ति येषां विषये चिन्तनं करणीयमस्ति। एवमेव येषां ग्रन्थकाराणां कालनिर्धारणविषये समस्या समुत्पद्यते तत्रापि शोधकार्यस्यावश्यकता विद्यते। यतोहि बहवो ग्रन्थास्तु लभ्यन्ते परञ्च तेषां ये कर्तारः सन्ति तेषां कालविषये कापि प्रमाणरूपेण सामग्री नोपलभ्यते तदन्वेषणम् अस्माकं कर्तव्यं विद्यते। पाण्डुलिपीनां संरक्षणार्थं तत्रापि कार्यम् अस्माभिर्विधेयम्।

**सन्दर्भग्रन्थाः-**


1.वाल्मीकिरामायणम्, वाल्मीकिः, गीताप्रेस, गोरखपुर, 2002

2.शिशुपालवधम्, माघः, श्रीपण्डितहरगोविन्दशास्त्री, चौ.वि.भ.वाराणसी, 2010

3.मालविकाग्निमित्रम्, कालिदासः, डा.रमाशंकरपाण्डेयः, चौ.सु.प्र.वाराणसी, 2003

4.काव्यात्ममीमांसा, डा. जयमन्तमिश्रः, चौ.वि.भ. वाराणसी, 2005

5.मालतीमाधवम्, भवभूतिः, डा.गंगासागररायः, चौ.वि.भ. वाराणसी,2002

6.काव्यप्रकाशः, मम्मटः, झल्लकीकरः, परिमलप्रकाशन, नई दिल्ली, 2005

7.ध्वन्यालोकः, आनन्दवर्धनः, जगन्नाथपाठकः, चौ.वि.भ. वाराणसी, 2009

8.रसगंगाधरः, प.जगन्नाथः, प.मदनमोहनझा, चौ.वि.भ. वाराणसी, 2005

9.साहित्यदर्पणः, शालिग्रामशास्त्री, मोतीलाल बनारसीदास, नई दिल्ली, 2000

10.निबन्धशतकम्, डा.कपिलदेवद्विवेदः, विश्वविद्यालयप्रकाशनम्, वाराणसी,2007

11.संस्कृतवाङ्मय का बृहद् इतिहास (काव्यशास्त्रखण्ड), बलदेवउपाध्याय, उत्तरप्रदेशसंस्कृतसंस्थान, लखनऊ

13.नैषधीयचरितम्, श्रीहर्षः, नारायणरामाचार्यः, चौ.वि.भ. वाराणसी, 2012